International Journal of Multidisciplinary Horizon


ISSN: **3049-2017**
IJMH 2026; 3(2): 254-257
© 2026 IJMH
www.themultijournal.com
Received: 28-03-2026
Accepted: 13-04-2026
Publish : 14-04-2026

**प्रो.परमानन्दभारद्वाजः**
आचार्यः, ज्योतिषविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,नवदेहली - 16

**Correspondence:**
**प्रो.परमानन्दभारद्वाजः**
आचार्यः, ज्योतिषविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,नवदेहली - 16

# अष्टकवर्गनिर्माणविधिः

**प्रो.परमानन्दभारद्वाजः**




होराशास्त्रस्य प्राचीनैः महर्षिभिः आचार्यैश्च सर्वेषां कर्मणाम् शुभाशुभफलानां परिज्ञानाय या पद्धतिः विकसिता, सा 'अष्टकवर्ग' इति नाम्ना ज्ञायते। अस्याः पद्धतेः विशेषज्ञानं विना बुद्धिमान् दैवज्ञोऽपि गुणदोषजन्यं शुभाशुभफलं सम्यक्तया ज्ञातुं न शक्नोति। अष्टकवर्गस्य ज्ञानेन मनुष्यस्य समस्तकर्मजनितं फलं वैज्ञानिकदृष्ट्यावगन्तुं शक्यते। अनया पद्धत्या फलादेशे सूक्ष्मता समायाति, यत्र व्यष्टिसमष्ट्योः अपूर्वसमन्वयस्य सिद्धान्तः दृश्यते।

**सर्व कर्म-फलोपेत-मष्टकवर्ग-मुच्यते।**
**अन्यथा फलविज्ञानं दुर्जेयं गुणदोषजम्।।**[1]
**सूक्ष्माष्टकवर्गसंशुद्धिः स्थूलाशुद्धिस्तु गोचरे।**
**तस्माद् गोचरमुत्सृज्य फलमप्यष्टवर्गतः।।**[2]

उदाहरणार्थम्, यदि कश्चन ग्रहः शुभग्रहयुतः दृष्टो वा सन् स्वराशौ, उच्चराशौ वा मित्रराशौ स्थितो भवेत्, तर्हि सः स्वभावसम्बन्धितानां विषयाणां वृद्धिं करिष्यति—इति तु सामान्यः सिद्धान्तः। किन्तु सा वृद्धिः कियती भविष्यति? अर्थात् कुलशुभफलानामशुभफलानां च कियत् अनुपातं वर्तते? एतस्मिन् विषये अष्टकवर्गपद्धतिरेव निर्णायिका मन्यते। अस्याः साहाय्येनैव आयु-धन-विद्या-बुद्धि-सुखादीनां विशेषनिर्णयः क्रियते।

महर्षिपराशरेण अष्टकवर्गस्य महत्तां प्रतिपादयता स्पष्टीकृतं यत् आयुर्दायनिर्णये, भाग्योदयस्य ज्ञाने, दशाफलानां विचारणे च अष्टकवर्गस्य उपयोगिता अनिवार्य वर्तते। अष्टकवर्गं विना एतेषां विषयाणां सूक्ष्मविवेचनं न सम्भवति।

अस्यैव मतस्य पुष्टिं कुर्वन्तः आचार्यमुकुन्ददैवज्ञवर्याः स्वकीये 'ज्योतिस्तत्त्व' नामके ग्रन्थे प्रतिपादयन्ति यत् न केवलं दशानिर्णये, अपितु गोचरविचारे, विवाहादिशुभकार्याणां कालनिर्धारणे च अष्टकवर्गस्य प्रयोजनम् अत्यावश्यकम् अस्ति। यथोक्तम्—

**अष्टकवर्गशुभैः श्रीमान् कर्म कुर्यान्नभश्चरैः।**
**गोचरस्यैस्तदप्राप्तौ तत्प्राप्तौ च वेधगैः॥**
**व्रतारम्भे विवादे च यात्रायां क्षद्रकर्मणि।।**[3]

लग्नेन सह सप्तग्रहाणां वर्गो यत्र निरूप्यते सोऽष्टकवर्गः । स्वार्थे कप्रत्यये अष्टक इति सम्पन्ने अष्टकवर्ग इत्युच्यते । अर्थाल्लग्नयुतानां सप्तग्रहाणां वर्ग एवाष्टक इति भावः ।

अष्टकवर्गस्य निर्माणं जन्मलग्नाधारेण भवति परम् अस्य फलादेशार्थं गोचरे प्रयोगो भवति । प्रतिदिनं प्रतिमासं प्रतिवर्ष च ग्रहगोचर-वशात् भिन्नं-भिन्नं स्थानेषु पृथक् पृथक् फलं यच्छति। कदा ग्रहः शुभो भवति कदा च अशुभो इति ज्ञानं अष्टकवर्गात् एव भवति ।

**होराशास्त्रं द्विधा प्रोक्तं सामान्यं निश्चयात्मकम् ।**
**सामान्यांशस्तु सम्प्रोक्तो निश्चयांशोऽथ कथ्यते ।।**[4]

ज्योतिषशास्त्रान्तर्गतफलकथनाय प्रविधयस्त्रयः प्रयुज्यन्ते । तत्र प्रथमः जन्मलग्नतः ग्रहाणां स्थित्यनुसारेण द्वितीयः महर्षिपराशरोक्त-विभिन्नदशानुसारेण तृतीयः च ग्रहगोचाराधारेण । गोचरविधौ मुख्यत्वेन तात्कालिकग्रहाणां प्रभावस्य विवेचनं क्रियते । गोचरोऽपि दीर्घकालिकः तात्कालिकश्चेति द्विधा विभक्तोऽस्ति । तत्र दीर्घका-लिको नाम ताजिकं भवति यत्र सम्पूर्णवर्षस्य वर्षफलाधारेण फलादेशः क्रियते । तथा तात्कालिकगोचरान्तर्गतराशिनक्षत्रचा-रवशात् प्रश्नलग्नात् अष्टकवर्गनिरूपणत्वात् च फलादेशो भवति । तात्कालिकग्रहप्रभावस्य मुख्यकेन्द्रं जन्मकालिक चन्द्रराशिः अर्थात् जन्मराशिर्भवति । जन्मकालिकचन्द्रराशितो ये ग्रहाः सञ्चारवशात् यत्र कुत्र भवन्ति तेषां ग्रहाणां सम्यक् विवेचनं गोचरविवेचनमुच्यते । चन्द्रराशितोऽपि हि "साढेसातीढैय्या" इत्यादिनां कथनं भवति । अष्टकवर्गपद्धतिः अतीव प्राचीना शुद्धा च पद्धतिः । इदं फलकथनं प्रसङ्गे सुधीभिः श्रेष्ठं मन्यते । अस्य समाश्रयेण जातकस्य जन्मकालिकग्रहस्थितेः गोचरेण सामञ्जस्यमुपकल्प्य नितरां प्रमाणिकं भविष्यत्कथनं कर्तुं शक्यते ।

**अष्टकवर्गेण ये शुद्धास्ते शुद्धाः सर्वकर्मसु।**
**सूक्ष्माष्टकवर्गशुद्धिः स्थूलशुद्धिश्च गोचरे ।।**[5]

आचार्यमन्त्रेश्वरोऽपि स्वग्रन्थे फलदीपिकायामष्टकवर्गस्य वैशिष्ट्य-मित्थं द्योतयति-

**गोचरग्रहवशान्मनुजानां यच्छुभाशुभफलाभ्युपलच्यैः।**
**अष्टकवर्ग इति यो महदुक्तस्तत्प्रसाधनमिहाभिदधेऽहम्।।**[6]

अष्टकवर्गरहस्यमनेकैराचार्यैः स्व-स्वग्रन्थेषु संक्षिप्ततया विवेचितं दृश्यते । सर्वप्रथमं श्रूयते यत् भगवान् भूतभावनः स्वयमेव पुरा यामलशास्त्रे अष्टकवर्गरहस्यं प्रोवाच । तत्पश्चाद् ब्रह्मानारदवशिष्ठ-पराशरादीनां ज्योतिषशास्त्रप्रवक्तॄनामनुक्रमेणायम् अष्टकवर्गः स्फुट-तामवाप । लग्नेन सह सप्तग्रहाणां वर्गो यत्र निरूप्यते सोऽष्टवर्गः। स्वार्थे कप्रत्यये अष्टक इति सम्पन्ने अष्टकवर्ग इत्युच्यते। अर्थाल्लग्नयुतानां सप्तग्रहाणां वर्ग एवाष्टक इति भावः । प्रायशः सर्वेष्वेव ज्योतिषग्रन्थेषु वर्णनञ्चास्य । नारदपुराणेऽप्यस्योल्लेखः । तदनन्तरं सर्वैः होराशास्त्रविद्भिराचार्यैर्वराहमिहिरकल्याणवर्म-मन्त्रेश्वरप्रभृतिभिरर्वाचीनैरप्यस्य गुणगण- महिमास्वीकृतिः । जा-तकग्रन्थेषु लग्नेन सह शेषसूर्यादिसप्तग्रहमण्डलम् अधिकृत्यैव अष्टक-वर्गो निरूपितः।

**अष्टकवर्गस्वरूपम्**

**कर्मज्ञानविदा वेदो द्विधा यद्वत्तदाह्वये।**
**होराशास्त्रं द्विधा प्रोक्तं संकीर्णं निश्चयात् ।।**[7]

अर्थाद्यथा वेदे कर्ममार्गो ज्ञानमार्गश्चेति भागद्वयमुपलभ्यते एवमत्रापि होराशास्त्रे सङ्कीर्णनिश्चयेति भागद्वयं दरीदृश्यते । सङ्कीर्णभाग एव ग्रन्थस्य पूर्वार्धे राशिभावग्रहादि प्रकारेण तथा निश्चयभागः एवोत्तरार्धस्तत्रापि चाष्टकवर्ग एव निश्चयभागः । अतो यो भागद्वयं वेत्ति स एव दैवज्ञः । **यो वेत्ति सम्यगेतत्तु दैवज्ञः स उदाहृतः** । अष्टकवर्गनिर्माणार्थं सर्वप्रथमं जन्मकुण्डल्यां सूर्यादिग्र-हाणां स्थित्यनुसारं तत्तत्स्थानाद्रेखानां विन्दूनाञ्च विचारो विहितः । रेखा, स्थानं, फलं, कला एते रेखायाः पर्यायवाचकाः सन्ति। करणं, विन्दुः दायः अक्षमेते शब्दाः विन्दुवाचकाः (०) विन्दोः पर्यायाः सन्तिति।

**पर्यायाः सन्ति रेखायाः रेखास्थानं फलं कला ।**
**अथैते करणं विन्दुर्दायोऽक्षं विन्दुवाचकाः ।।**
**भिन्नाष्टकवर्गजनिताखिलबिन्दवः स्युः ।।**[8]

अत्रास्मिन् व्याख्याने विन्दवः शुभाः रेखाश्च अशुभा इति प्रतिपादितम् । कुत्राचिच्च रेखाः शुभाः विन्दवः अशुभाः इत्यप्युपल-भ्यते । परं फलज्ञाने न व्यभिचारः । यतो नाम भेद एव केवलम् । विधिस्तु तुल्यमेव । अत्र विन्दुरेखयोः स्वतः शुभाशुभफलदायक-क्षमता नास्ति अपि तु संकेतमात्रमस्ति ।

**भिन्नाष्टकवर्गः**

सूर्यादिग्रहाणां पृथक् पृथक् गोचरवशात् शुभाशुभफलज्ञानार्थं भिन्नाष्टकवर्गस्यावश्यकता भवति । एतदर्थमत्र मया सर्वेषां ग्रहाणां लग्नसहितेन भिन्नाष्टकवर्गप्रस्ताराष्टकवर्गरूपेण च सूर्याष्टकवर्गस्य सोदाहरणं प्रतिपादनं विस्तरेण कृतमस्ति । अन्येषां ग्रहाणां शुभस्थानानि प्रदर्शितानि ।

**सूर्याष्टकवर्गः स्वादर्कः प्रथमाय बन्धुनिधनद्वयाज्ञातपोद्यूनगो,**
**वक्रात्स्वादिव तद्वदेव रविजाच्छुक्रात्स्मरान्त्यारिषु।**

**जीवाद्धर्मसुताय शत्रुषु दशत्र्यायारिगः शीतगो-**
**रेष्वेवान्त्यतपः सुतेषु च बुधाल्लग्नात्स बन्ध्वन्त्यगः।।**[9]

यत्र यस्मिन् राशौ जन्मकालिकसूर्यः स्थितः स एव तस्य स्वस्थानमुच्यते । एवमन्येषामपि ग्रहाणां ज्ञेयम् । यो यत्र व्यवस्थितः स एव तस्य ग्रहस्य स्वस्थानं तस्मात्स्थानात् एव गणना भवति । **स्वादर्कः** यथा सूर्यः स्वजन्मकालिकस्थानात् **प्रथमायवन्धुनिधनद्वया-ज्ञातपोद्यूनगः** अर्थात् प्रथमैकादशचतुर्थाष्टमद्वितीयदशमनवमसप्तमेषु (१, ११, ४,८, २, १०, ९, ७) एतेषु स्थानेषु गतः गोचरीयसूर्यः इष्टफलदः अर्थादिवान्यस्थानेष्वशुभ अनिष्ट फलदः निगदितमिष्टं नेष्टमन्यत् अशुभस्थानानि तृतीयपञ्चमषष्ठद्वादशाः सन्ति । इत्येव सर्वत्र ज्ञेयम् । येष्वेव जन्मकालिकस्थितभौमात् रविजात् च गोचरीयसूर्यः पूर्वोक्तस्थानेषु (१,११,४,८,२,१०,९,७) तथा च जन्मकालिकशनितः एतेषु स्थानेषु अपि गोचरसञ्चारवशात्सूर्यः शुभफलप्रदायको भवति । जन्मलग्नस्थितशुक्रात् संचारवशात् सूर्यः यदा **"स्मरान्तयारिषु"** सप्तमद्वादशषष्ठेषु (७,१२,६) स्थानेषु स्यात्तर्हि शुभः। **जीवाद्धर्मसुताय शत्रुषु** जन्मलग्नस्थितबृहस्पतिस्थानात् नवमपञ्चमैकादशषष्ठेषु स्थानेषु (९,५,११,६) शुभः गोचरवशात्सूर्यो भवति । **दशत्र्यायारिगः शीतगो** जन्मकालिकचन्द्रतः गोचरीयसूर्यः दशमतृतीयैकादशषष्ठगेषु (१०,३,११,६) शुभः । **ऐतेष्वेवान्त्यतपः सुतेषु च बुधाच्छुभः** अर्थात् प्रागुक्तेषु चन्द्रस्थानेषु दशमतृतीयैकाद-शषष्ठस्थानसहितेषु द्वादशनवमपञ्चमेषु च ( १०,३,११,६,१२,९,५) बुधात् सूर्यः शुभो भवति । **लग्नात्सबन्ध्वन्त्यगः** अत्र स शब्देन प्रागुक्तानि चन्द्रस्थानान्यनुकृष्यन्ते । तेनैतेषु चन्द्रस्थानेषु दशमतृतीयैकादशषष्ठस्थानेषु सबन्ध्वन्त्येषु चतुर्थद्वादशसहितेषु गतः सूर्यः लग्नाच्छुभः ज्ञेयः ।

जन्मकुण्डल्यां स्पष्टग्रहाणाम् अंशादीनां च आधारेण भिन्नाष्टवर्गस्य सारणी रच्यते।


| ग्रहाः | सू. | च. | मं. | बु. | गु. | शु. | श. | ल. | |
|---|---|---|---|---|---|---|---|---|---|
| जन्मलग्न स्थितग्रह – स्थानात् शुभस्थानानि | १ २ ४ ७ ८ ९ १० ११ | ३ ६ १० ११ | १ २ ४ ७ ८ ९ १० ११ | ३ ५ ६ ९ १० ११ १२ | ५ ६ ९ ११ | ६ ७ १२ | १ २ ४ ७ ८ ९ १० ११ | ३ ४ ६ १० ११ १२ | निगदितमिष्टं नेष्टमन्यत् |
| शुभ - बिन्दुयोगः | ८ | ४ | ८ | ७ | ४ | ३ | ८ | ६ | ४८ |
| अशुभ - रेखायोगः | ४ | ८ | ४ | ५ | ८ | ९ | ४ | ६ | ४८ |
| कुल | १२ | १२ | १२ | १२ | १२ | १२ | १२ | १२ | ९६ |

## तात्कालिकस्पष्टग्रहाणां चक्रम्

| ग्रहः | अस्त | राशिः | अंशः | गतिः | नक्षत्रम् | चरणम् | नक्षत्र क्रमः |
|---|---|---|---|---|---|---|---|
| लग्नम् | - | वृषः | २-४२-१२ | - | कृतिका | २ | ३ |
| सूर्यः | - | कुम्भः | ९-०२-३६ | १-००-२५ | शतभिषा | १ | २४ |
| चन्द्रः | - | कन्या | ११-५५-२५ | १३-२६-२७ | हस्तः | १ | १३ |
| भौमः | - | मीनः | १३-५३-१० | ०-४५-२३ | उ. भाद्रपदः | ४ | २६ |
| बुधः | - | कुम्भः | २३-१६-५३ | ००-०७-३७ | पू. भाद्रपरः | १ | २५ |
| गुरुः | - | मेषः | ०७-२३-२९ | ०-१०-३७ | अश्विनी | ३ | १ |
| शुक्रः | - | मकरः | ११-०७-३५ | ०१-१४-०४ | श्रवणः | १ | २२ |
| शनिः | - | मेषः | १७-५७-१९ | ००-०४-१७ | भरणी | २ | २ |
| राहुः (व) | - | कर्कः | ०९-३२-२४ | ००-०४-४० | पुष्यः | २ | ८ |
| केतुः (व) | - | मकरः | ०९-३२-२४ | ००-०४-४० | उतराषाढा | ४ | २१ |

## सूर्य

| | मेष | वृषभ | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुंभ | मीन | योग |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सूर्य | 0 | 1 | 0 | 0 | 1 | 1 | 1 | 1 | 1 | 0 | 1 | 1 | 8 |
| चन्द्र | 0 | 0 | 1 | 1 | 0 | 0 | 0 | 1 | 0 | 0 | 1 | 0 | 4 |
| मंगल | 1 | 0 | 1 | 0 | 0 | 1 | 1 | 1 | 1 | 1 | 0 | 1 | 8 |
| बुध | 1 | 0 | 1 | 1 | 0 | 0 | 1 | 1 | 1 | 1 | 0 | 0 | 7 |
| गुरू | 0 | 0 | 0 | 0 | 1 | 1 | 0 | 0 | 1 | 0 | 1 | 0 | 4 |
| शुक्र | 0 | 0 | 1 | 1 | 0 | 0 | 0 | 0 | 1 | 0 | 0 | 0 | 3 |
| शनि | 1 | 1 | 0 | 1 | 0 | 0 | 1 | 1 | 1 | 1 | 1 | 0 | 8 |
| राहू | 1 | 0 | 0 | 1 | 1 | 0 | 1 | 0 | 0 | 0 | 1 | 1 | 6 |
| योग | 4 | 2 | 4 | 5 | 3 | 3 | 5 | 5 | 6 | 3 | 5 | 3 | |



अष्टकवर्गपद्धतिः भारतीयहोराशास्त्रस्य एका वैज्ञानिकी विधा अस्ति, या फलकथने सूक्ष्मतां च आनयति। यद्यपि जन्मकुण्डल्यां ग्रहाणां रस्थित्यानूसारं शुभत्वाशुभत्वं ज्ञायते, तथापि तस्य फलस्य प्रमाणं ज्ञातुम् अष्टकवर्गस्य विश्लेषणं अनिवार्यम् । महर्षिपराशरादिभिः आचार्यैः अस्याः पद्धत्याः महत्त्वं स्पष्टीकृतं यत् आयुर्दायः, भाग्योदयः, दशाफलानि तथा च गोचरविमर्शः अष्टकवर्गं विना अपूर्णाः इति।

अष्टकवर्गस्य मूलं सप्तग्रहाणां तथा च लग्नस्य समन्वितशक्तिः अस्ति, यत्र प्रत्येकं ग्रहः स्वकीयात् स्थानात् तथा अन्येभ्यः ग्रहेभ्यः विशिष्टेषु स्थानेषु शुभं (विन्दुं) वा अशुभं (रेखां) वा फलप्रदानं करोति। इयमेव पद्धतिः व्यष्टिसमष्ट्योः अद्भुतं समन्वयम् उपस्थापयति। वस्तुतः, जन्मकालीनग्रहस्थितिः गोचरकालेन सह कथं पलप्रकटी करोति, इत्यस्य श्रेष्ठतमो निर्णयः अष्टकवर्गेणैव सम्भवति।

बृहद्देवज्ञरञ्जनेऽष्टकवर्गेण पाणिग्रहणादिषु लग्नशुद्धेरत्यधिक महत्त्वं स्वीकृतम्। तद्यथा-

**यथोदये चन्द्रमसः प्रकाशो दिगङ्गनानां मुखकैरवस्य।**
**तथाष्टकवर्गग्रहलग्नशुद्धा कार्यस्य पुंसां भवतीह शुद्धिः।।**[10]

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् होराशास्त्रस्य 'निश्चयभागः' अष्टकवर्ग एव अस्ति। यः दैवज्ञः अष्टकवर्गस्यान्तगते भिन्नाष्टकवर्गस्य रहस्यं जानाति, स एव जातकस्य जीवने सम्भाव्यमानानां शुभाशुभफलानां विवेचनं कर्तुं समर्थो भवति। एषा पद्धतिः न केवलं शुद्धा प्राचीना च अस्ति, अपितु मानवकर्मणां वैज्ञानिकदृष्ट्या अवबोधने अपि महती भूमिकां निर्वहति।

**पाद टिप्पणी:**

1. अष्टकवर्ग सिस्टम आफ प्रिडिक्शनज, भूमिका, पृ.सं.-२
2. राजमार्तण्डः, विवाहपटलम् श्लो.सं. ४५३
3. फ.ज्यो.वि.बृ.पा.स.- पृ.सं.-३३५
4. बृहत्या. होरा. शा. अष्टकवर्गाध्यायः श्लोक, १०
5. भारतीयकुण्डलीविज्ञानम्, पृ.सं.-५७
6. फल. दी.- अ.-२३, श्लो.-५
7. बृहत्या. होरा. शा. उतराभाग १/१५
8. जा.पा.- अ.-१०, श्लो.-१
9. बृहज्जातकम् अ. ९/१
10. बृहदैवज्ञरञ्जनम्, विवाहकथनप्रकरणे, श्लो.सं. ८३